उपशास्त्री - II खण्ड साहित्यम्

रघुवंशमहाकाव्यम् = द्वितीयः सर्गः

प्रश्न - स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम् ।
पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति।

अस्मिन् श्लोके राजा दिलीपं प्रति महर्षि वसिष्ठस्य उक्ति - प्रशंसित स्वभावः सज्जनप्रियश्च राजा दिलीपः गुरोराज्ञया वत्सपान होमादिकार्ययोरनन्तरमवशिष्टं नन्दिनी दुग्धं स मुज्ज्वलं साकारं यश इव अतिप्रेम्ना पीतवान।

व्याख्या - अनिन्दितात्मा = अगर्हितस्वभावः, सद्वत्सल = सज्जनानुरागवान्, वसिष्ठेन = गुरुणा, कृताभ्यनुज्ञः = दत्तानुमितः, सः = राजा दिलीपः, वत्सहुतावशेषं = वत्सपानयज्ञाहुत्यवशिष्टम्, नन्दिनीस्तन्यं = नन्दिनीपयः मूर्तं = मूर्तिमत्, शुभ्रं = शुक्लम्, यश इव = कीर्तिमिव, अतितृष्णः = उत्कण्ठितः सन्, पपौ = पीतवान् ।

Renu Devi
11/10/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

शास्त्री-II खण्ड साहित्यम्

त्रयोदशः सर्गः रघुवंशमहाकाव्यम्

प्र०(1)- इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य स भ्रातरं भरतमर्घ्यपरिग्रहान्ते ।
पर्यश्रुरस्वजत मूर्धनि चोपजघ्रौ तद्भक्त्यपोढपितृराज्यमहाभिषेके ॥

उत्तरम्- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य त्रयोदशसर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके भगवान् श्रीरामः गुरु वसिष्ठम् प्रणाम्य कृत्वा कथयति -

पवित्रात्मा श्रीरामः कुलगुरुं वसिष्ठमुनिं प्रथमं प्रणम्य भरतोपहृतमर्घ्यादिकं स्वीकृत्य प्रेम्णा भरतं समालिङ्ग्य च निजानुरागत्यक्तजनकराज्याभिषेके भरतशिरसि आघ्रातवानिति भावः।

व्याख्या:- प्रयतः = बाह्याभ्यन्तरपवित्रः। सः = रामः। इक्ष्वाकुवंशगुरवे = इक्ष्वाकुकुलाचार्याय वसिष्ठाय। प्रणम्य = नमस्कृत्य। अर्घ्यपरिग्रहान्ते अर्घ्यस्वीकारावसाने। ग्रहणानन्तरम्। पर्यश्रुः = उद्गतानन्दवाष्पः सन्। भ्रातरम् = अनुजम्। भरतम् = कैकेयीतनुजम्। अस्वजत = आलिङ्गितवान्। तद्भक्त्यप्रोढपितृराज्यमहाभिषेके = रामभक्ति-परित्यक्तजनकराज्यविशिष्टाभिषेचने। मूर्धनि = भरतशिरसि। उपजघ्रौ = आघ्रातवान्।

Renu Devi
11/10/20

राधा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया।

शास्त्री-I खण्ड          साहित्यम्

सप्तमोऽङ्कः अभिज्ञान शाकुन्तलम्

प्र०(1) - महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे ।
स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोक महाकवि कालिदास प्रणीतस्य अभिज्ञान शाकुन्तलम् नाट्यशास्त्रस्य सप्तमोऽङ्कात् उद्धृतोऽस्ति। अस्मिन् श्लोके राजा दुष्यन्तः आत्मानं भविष्यन्तं तपस्विनीमप्यरप्रदर्शितेनावहेलनां केसरिकिशोरेण क्रीडन्तं बालकं वीक्ष्य तस्य स्वाभाविकी ओजस्विता निश्चिन्वन्

व्याख्या → राजा दुष्यन्तः कथयति - महतः = प्रबलस्य, तेजसः = प्रतापस्य बीजं = निदानम् यथा बीजमङ्कुरादिक्रमेण महातरू भवति तथा महातेजा भविष्यन्, अयं = पुरोवर्ती सिंहशिशुमाकर्षयन् बालः स्फुलिङ्गावस्थया स्फुलिङ्गस्य = अग्निकणस्य अग्निकणस्य अवस्था = रूपं तया स्फुलिङ्गावस्थया = अग्निकणावस्थया एधापेक्षः एधान् = इन्धनानि अपेक्षते इत्येधापेक्षः = काष्ठापेक्षः स्थितः वह्निः = अनल इव = यथा मे = मम प्रतिभाति = प्रकाशते ।

अणुरप्यग्निः स्फुलिङ्गः काष्ठसंयोगाद् यथा प्रवृद्धो महते तेजसे सम्पद्यते तथैवायं बालः अनल्पस्य महापुरुष तेजसो बीजमिव समयापेक्षो वर्द्धिष्णुर्भाव्यते। अत्रोपमानुप्रासौ अलङ्कारौ छन्दश्चानुष्टुप् ।

Renu Devi
11/10/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

उपशास्त्री - I खण्ड साहित्यम्

रघुवंश महाकाव्यम् - द्वितीयः सर्गः

प्र० (1) – शशाम वृष्ट्याऽपि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ।
ऊनं न सत्त्वेष्वधिको बबाधे तस्मिन् वने गोप्तरि गाहमाने ॥

उत्तरम् – प्रसंगः – प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति । अस्मिन् श्लोके धर्मात्मनो राज्ञो दिलीपस्य तस्मिन् वने प्रवेशमात्रेण वृष्टिं विनापि वनाग्निः शान्तो जात, फलेषु पुष्पेषु च वैशिष्ट्यमभवत्, किञ्च 'जीवो जीवस्य भक्षणम्' इत्यनुसारं वन्यपशुषु परस्परं प्रबलः प्राणी दुर्बलं न पीडितवान् ।

व्याख्या: – गोप्तरि = रक्षके, तस्मिन् = राजनि दिलीपे, वनं = विपिनम्, गाहमाने = प्रविशति सति, वृष्ट्या विनापि = वर्षणमन्तरापि, स्वयमेव दवाग्निः = वनानलः, शशाम = शान्तः, फलपुष्प-वृद्धिः = फलकुसुमसमृद्धिः, विशेषा = अतिशयिता, आसीत् = बभूव, किञ्च सत्त्वेषु = जन्तुषु मध्ये, अधिकः = प्रबलो बलवान् वा सिंहादि, ऊनं = दुर्बलं मृगादिकम्, न बबाधे = नैव पीडयामास

Renu Devi
11/10/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।